**शुण्ड** पु० शुन-ड तस्य नेत्त्वम् । १मदनिर्झरे हेमच०। २गजहस्ते पुंस्त्री० स्त्रीत्वे टाप् । ३मद्यपानगृहे ४वेश्यायां ५सुरायां ६जलहस्तिन्याञ्च स्त्री मेदि० । ७नलिन्यां विश्वः । ८कुम्भिन्याञ्च स्त्री शब्दमा० ।

**शुण्डापान** न० शुण्डा सुरा पीयतेऽत्र पा-आधारे ल्युट् । १मद्यपानगृहे अमरः । ६त० । २मद्यपाने च ।

**शुण्डार** पु० शुण्डा अस्त्यर्थे र । १शौण्डिके शब्दच० २हस्तिनि च । अपकर्षे र । ३अपकृष्टशुण्डायाम् स्त्री । लच् । शुण्डाल हस्तिनि धनञ्जयः । [शब्दच०।

**शुण्डिन्** पु० शुण्डाऽस्त्यस्य इनि । १हस्तिनि २शौण्डिके

**शुण्डिमूषिका** स्त्री शुण्डिनो मूषिकेव । छुछुन्दर्य्यां (छुँछ) राजनि० । [(हातिशुँड़ा) वृक्षे राजनि० ।

**शुण्डी** स्त्री शुण्डाकारोऽस्त्यस्याः अच् गौरा० ङीष् ।

**शुद्ध** न० शुध-क्त । १सैन्धवलवणे २मरिचे च राजनि० । ३केवले ४निर्दोषे ५पवित्रे मेदि०। ६शुभ्रे च त्रि० ।

शुद्ध्यशुद्धी शास्त्रगम्ये संस्काररूपे यथोक्तं

"शुद्ध्यशुद्ध्योः संस्काररूपत्वेन एकपुरुषस्यैकदोभयस्थिति र्घटते । शुद्धेर्भावरूपत्वे अशुद्धेस्तदभावरूपत्वे नैतत् विरोधात् । अतएव शङ्खः "ततः श्राद्धमशुद्धौ तु कुर्य्यादेकादशे तथा । कर्त्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः" अशुद्धौ चतुर्थाहादौ । कथमशुद्धौ श्राद्धं? कालाशौचयोरधिकारिविशेषणत्वादत आह कर्त्तुस्तात्कालिकी शुद्धिरिति । श्राद्धविधानाक्षेपात् तस्मात्तन्निष्ठा शुद्धिः कल्प्यते "स पुनरशुद्धः कर्मान्तरे" श्रा०त्रि०। शुद्धितत्त्वे च "एवं शुद्धेर्भावरूपत्वे अशौचस्य तदभावरूपत्वे विरोधः तथात्वे अशौचसङ्करोऽपि न स्यात् । एकस्मिन् शुद्ध्यभावरूपे अशौचे सत्यपरस्य तद्रूपस्य तदानीं तत्पुरुषीयशुद्धिरूपप्रतियोग्यन्तराभावात् अनुपपत्तेः । तस्मात् शुद्ध्यशुद्ध्योर्भावरूपत्वम् ।

पद्मपु० उत्त०ख०१९अ० कतिचिदशुद्धा उक्ताः । तद्भिन्नस्यैव शुद्धता यथा

"जातके मृतकेऽस्नाते जलौकोभिः क्षते तथा । अपवित्रो द्विजातीनां देहः सन्ध्यादिकर्मसु । अपूततनुरुत्सर्गे नरो मूत्रपुरीषयोः । अस्पृश्यस्पर्शने चैव ब्रह्मयज्ञजपादिषु । रक्तपाते नखच्छेदकृदन्तखड्गादिभिः क्षते । विषादेरशुचिः कायः शस्त्रास्त्रैः कण्टकादिभिः । भुक्त्वा ह्यस्नाननोच्छिष्टेऽपवित्रः कृतमैथुने । शयने ब्राह्मणादीनां शरीरं क्षुरकर्मणि । ज्वरादिभिस्तथा सर्वरोगैर्युक्त द्विजन्मनाम् । वपुरप्रयतं पूजादानहोमजपादिषु । धूमोद्गारे वमौ श्राद्धपतितान्नादिभोजनैः । तथा च रेतःस्खलने मर्त्यदेहोऽपवित्रता । अपवित्रं द्विजातीनां वपुः स्यादृक्षुद्रदर्शने । गर्हितदानग्रहणे पतिते पातकादिभिः । अशौचान्तेन शुद्धिः स्यात् जातके मृतकेऽपि च । सर्वत्राश्रमादीनां तनोः सन्ध्यादिकर्मसु" । मृतकादिभिर्न स्नानापनेयतेति । अशौचशब्दे द्रव्यशुद्धिशब्दे च दृश्यम् । [ङीप् ।

**शुद्धजङ्घ** पुंस्त्री शुद्धा जङ्घा यस्य । गर्दभे त्रिका० स्त्रियां

**शुद्धमांस** न०२१८२पृ० कृतान्नशब्ददर्शिते पक्वमांसभेदे [शब्दच०।

**शुद्धवल्ली** स्त्री कर्म०। १गुडूच्यां शब्दच०२पवित्रायां लतामात्रे

**शुद्धान्त** पु० शुद्धः निर्दोषः अन्तः पर्य्यन्तो यस्य । १नृपान्तःपुरे उपचारात् तत्र स्थितायां २राजयोषिति पुंस्त्री० "शुद्धान्तसम्भ्रमनितान्ततुष्टे" इति नैषधम् । शुद्धं शुद्धिः ६त०। ३अशौचान्ते ।

**शुद्धापह्नुति** स्त्री कर्म०। "शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः" चन्द्रालोकोक्ते अर्थालङ्कारभेदे ।

**शुद्धि** स्त्री शुध-क्तिन् । १मार्जने जटा० २नैर्मल्यसम्पादने ३वैदिककर्मयोग्यत्वासम्पादकसंस्कारभेदे च । ४दुर्गायां "स्मरणाच्चिन्तनाद्वापि शोध्यते येन पातकात् । तेन शुद्धिः समाख्याता देवी रुद्रतनौ स्थिता" देवीपु०तन्नामनिरुक्तिः

**शुद्धोदनसुत** पु० बौद्धभेदे हेमच० ।

**शुध** शौचे शोधने सक० निःशेषभवने अक० च दि० पर० अनिट् । शुध्यति शुदित् अशुधत् । "भक्तो हरः शुध्यति यद्गुणः स्यादिति" लीला० ।

**शुन** गतौ तु० पर० सक० सेट् । शुनति अशोनीत् ।

**शुन** पु० शुन-क । कुक्कुरे । कि । तत्रैव वाचस्पतिः ।

**शुनःशेफ** पु० शुन इव शेफोऽस्य अलुक्समा० । विश्वामित्रशिष्ये मुनिभेदे । [राजनि० ।

**शुनक** पु० शुन इव कन् । १मुनिभेदे स्वार्थे क । २कुक्कुरे

**शुनकचञ्चुका** स्त्री शुनकस्येव चञ्चुः पत्रं यस्याः कप् । क्षुद्रचञ्चुक्षुपभेदे राजनि० ।

**शुनकचिल्ली** स्त्री शुनकप्रिया चिल्ली । शाकभेदे राजनि० ।

**शुनासीर** पु० शुनः सीरं यस्य पृषो०। १इन्द्रे २पेचके च पृषो० तस्य रूपत्रयम् द्विरूपकोषे उक्तं यथा "शुनाशीरो द्वितालव्यः सुनासीरो द्विदन्त्यकः । तालव्यादिर्दन्त्यमध्यः शुनासीरश्च दृश्यते" ।

**शुनी** स्त्री श्वन्+स्त्रियां ङीप् । १कुक्कुरयोषिति अमरः ।